# Shri Virabhadrabhujangaprayata Stotram

# श्रीवीरभद्रभुजङ्गप्रयातस्तोत्रम्

## Document Information

Text title : Shri Virabhadrabhujangaprayata Stotram 02 22

File name : vIrabhadrabhujangaprayAtastotram.itx

Category : shiva, bhujanga, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-22

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीवीरभद्रभुजङ्गप्रयातस्तोत्रम्

गुणादोषभद्रं सदा वीरभद्रं
    मुदा भद्रकाल्या समाश्लिष्टमुग्रम् ।
स्वभक्तेषु भद्रं तदन्येष्वभद्रं
    कृपाम्भोधिमुद्रं भजे वीरभद्रम् ॥ १॥

महादेवमीशं स्वदीक्षागताशं
    विबोध्याशुदक्षं नियन्तुं समक्षे ।
प्रमार्ष्टुं च दाक्षायणीदैन्यभावं
    शिवाङ्गाम्बुजातं भजे वीरभद्रम् ॥ २॥

सदस्यानुदस्याशु सूर्येन्दुबिम्बे
    कराङ्घ्रिप्रपातैरदन्तासिताङ्गौ(ङ्गे) ।
कृतं शारदाया हृतं नासभूषं
    प्रकृष्टप्रभावं भजे वीरभद्रं (?) ॥ ३॥

सतन्द्रं महेन्द्रं विधायाशु रोषात्
    कृशानुं निकृत्ताग्रजिह्वं(प्रधाव्य) ।
?? कृष्णवर्णं बलाद्भासभानं
    प्रचण्डाट्टहासं भजे वीरभद्रम् ॥ ४॥

न रक्षोऽधिकः सप्ततन्तौ समुद्रं
    पुरोडाशभागं ?? ।
?? प्रदेशे ?? ।
    कृतं तन्त्रभूतं भजे वीरभद्रम् ॥ ५॥

जलाधीश्वरोऽसौ कृशानुप्रदेशे
    यथा वर्तते चेत्तथाग्निः प्रशान्तः ।
भवेदित्यलं वार्धि
    ?? विक्षिप्य हृष्टं भजे वीरभद्रम् ॥ ६॥

गगत्प्राण(मा)शाधिपानां प्रपञ्चे
महान्तं मृगारूढमुक्त्वा सरोषम् ।
कुबेरं च वैरूप्यदृष्टिं च कृत्वा
सपाण्ड्वङ्गमीशं भजे वीरभद्रम् ॥ ७॥

तथान्यान् दिगीशान् सुरानुग्रदृष्ट्या
ऋषीनल्पबुद्धीन् धरादेववृन्दान् ।
विनिर्भर्त्स्य हुत्वानले त्रिर्गणौघै-
रघोरावतारं भजे वीरभद्रम् ॥ ८॥

विधातुः कपालं कृतं पानपात्रं
नृसिंहस्य कायं (?) च शूलाङ्गभूषम् ।
गले कालकूटं स्वचिह्नं च धृत्वा
महौद्धत्यभूषं भजे वीरभद्रम् ॥ ९॥

महादेव मद्भाग्यदेव प्रसिद्ध (प्रसीद)
प्रकृष्टारिबाधामलं संहराशु ।
प्रयत्नेन मां रक्ष रक्षेति यो वै
वदेत्तस्य देवं भजे वीरभद्रम् ॥ १०॥

महाहेतिशैलेन्द्रधिकास्ते
करासक्तशूलासिबाणासनानि ।
शरास्ते युगान्ताशनिप्रख्यशौर्या
भवन्तीत्युपास्यं भजे वीरभद्रम् ॥ ११॥

यदा त्वत्कृपापात्रजन्तुस्वचित्ते
महादेव वीरेश मां रक्ष रक्ष ।
विपक्षानमून् भक्ष भक्षेति यो वै
वदेत्तस्य मित्रं भजे वीरभद्रम् ॥ १२॥

अनन्तश्च शङ्खस्तथा कम्बलोऽसौ
वमत्कालकूटश्च कर्कोटकाहिः ।
तथा तक्षकश्चारिसङ्घान्निहन्या-
दिति प्रार्थ्यमानं भजे वीरभद्रम् ॥ १३॥

गलासक्तरुद्राक्षमालाविराज-

द्विभूतित्रिपुण्ड्राङ्कभालप्रदेशः ।
सदा शैवपञ्चाक्षरीमन्त्रजापी
भवे भक्तवर्यः स्मरन् सिद्धिमेति ॥ १४॥

भुजङ्गप्रयातर्महारुद्रमीशं
सदा तोषयेद्यो महेशं सुरेशम् ।
स (भूत्वा) धरायां समग्रं च भुक्त्वा
विपद्भ्यो विमुक्तः सुखी स्यात्सुरः स्यात् ॥ १५॥

॥ इति श्रीवीरभद्रभुजङ्गप्रयातस्तोत्रं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Virabhadrabhujangaprayata Stotram*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*